रात्रौ भद्रासत्त्वात् तत्र च तन्निषेधात् परेऽह्नि प्रतिपद्येव कुर्य्यात्। "सार्द्धयामत्रयं वा स्याद् द्वितीयदिवसे यदा। प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृता" इति भविष्यवचनादिति निर्णयामृतकारः। मदनरत्नेऽप्येवम्। यत् तु "वृद्धौ वह्निं परित्यजेदिति" भविष्यम्। वृद्धौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः तदुक्तभिन्नविषयमिति तत्रैवोक्तम्। अन्ये तु तस्यां भद्रामुखं त्यक्त्वा कार्य्या। "प्रदोषव्यापिनी चेत् स्याद् यदा पूर्व्वदिने तथा। भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम्" इति नारदवचनात्। "निशागमे प्रपूज्येत होलिका सर्व्वदा बुधैः। न दिवा पूजयेद्धोलां पूजिता दुःखदा भवेत्" इति दिवोदासीयवचनात्। "यामत्रयोर्द्ध्वयुक्ता चेत् प्रतिपत्तु भवेत्तिथिः। भद्रामुखं परित्यज्य कार्य्या होला मनीषिभिः" इति विद्याविनोदेऽभिधानाच्च। भद्रामुखं विहाय पूर्व्वदिन एव कार्य्येत्याहुः। भद्रामुखन्तु "नाड्यस्तु पञ्च वदनं गणकास्तथैके" इति रत्नमालोक्तं ज्ञेयम्। शिष्टाचारोऽप्येवमेव। अत्र चेच्चन्द्रग्रहणं तदा ततोऽर्व्वाङ्निशि भद्रावर्जं पौर्णमास्यां होलिकादीपनम् अथ परेऽह्नि ग्रस्तोदयस्तदा पूर्व्वदिने भद्रावर्जं रात्रौ चतुर्थयामे विष्टिपुच्छे वा होलिका कार्य्या। अहोत्तरं प्रतिपत्सत्त्वात् तत्पूर्व्वञ्च दिवा होलानिषेधादिति दिवोदासचन्द्रप्रकाशौ। वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्त्वे कर्म्मकालस्पर्शे चतुर्थयामादिगौणकालग्रहणे मानाभावाद्भद्राभावाच्च ग्रहणकाल एव होला कार्य्या। न च "सर्व्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्म्माणि कुर्व्वीत शृतमन्नं विवर्जयेदिति" निषेधात् कथं सूतके होलेति वाच्यम् तस्योत्तरार्द्धशेषत्वात्। पूजामन्त्रस्तु "असृक्पाभयसन्त्रस्तैः कृता त्वं होलि! बालिशैः। अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव" इति। यत्तु वार्त्तिककारैर्होलिका आचारप्राप्तेत्युक्तम्। तत्र हेमाद्र्याद्युदाहृतभविष्यवचनान्यसिद्धानि कृत्वा चिन्ता ज्ञेया आन्त्यधिकरणवत्। हुताशनी मलमासे न भवति" नि॰सि॰।

**होलाकाधिकरण** न॰ जैमि॰ प्रथमस्य द्वितीयपादे दर्शिते न्यायभेदे तच्च तत्त्वबोधिन्याम् संक्षिप्य दर्शितं यथा "होलाका प्राच्याभिमानिभिः क्रियते होलाका च वसन्तोत्सवविशेषः हुलीतिप्रसिद्धः। एवमाह्नीनैबुकादिकं दाक्षिणात्यैः, आह्नीनैबुकं स्वस्वकुलागतं करञ्जाकादिस्थावरदेवतापूजादिकं तद्देशप्रसिद्धम्। उद्वृषभयज्ञादिकमुदीच्यैः क्रियते उद्वृषभयज्ञस्य ज्यैष्ठ्यां पौर्णमास्यां बलीवर्द्दानभ्यर्च्य धारयन्ति यत् सः तद्देशप्रसिद्धः एवं हारीताद्युक्तस्मृतयोऽपि काश्चित् कस्मिंश्चिद्देशविशेषे दृश्यन्ते स्मृत्युक्तकर्म्माणि तत्तच्छाखीकर्त्तृकाणीत्येषां मूलभूताः श्रुतयः कल्पनीयाः। ताश्च किं प्राच्यैर्होलाका कर्त्तव्येत्यादिरूपा प्राच्यादिपदघटिता व्यवस्थितविषया उत होलाका कर्त्तव्या इति तत्तत्पदाघटिता सामान्यविषया इति संशयः तत्र प्राच्यादिपदघटितैव कल्प्या देशविशेषाणामाचारदर्शनात् लिङ्गव्यवस्थया हि लिङ्ग्यनुमीयते यथा यत्र धूमोऽवगतस्तत्रैव वह्निरनुमीयते नान्यत्र तथा च सूत्रम् "अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात्" अस्यार्थः। अनुमानव्यवस्थानात् धूमादिव्यवस्थया वह्न्याद्यनुमानव्यवस्थादर्शनात् तत्संयुक्तं प्राच्यादिपदघटितम् अनुमेयश्रुतिवाक्यं प्रमाणं स्यादिति प्राप्ते राद्धान्तायोक्तम् "विशेषाभावमात्रेण प्रसिध्येत् सर्व्वधर्म्मता। विशेषणात् व्यवस्था स्यात् तच्च नेहोपपद्यते"। अस्यार्थः विशेषाभावमात्रेण हारीतस्मृतिगोभिलसूत्रादौ शाखिविशेषप्रतिपादकपदाभावेन तत्तत्स्मृत्युक्तस्य सर्व्वधर्म्मता सर्व्वसाधारणी कर्त्तव्यता प्रसिध्येत्। तथा हि छन्दोगो हि गोभिलादिः स्वशिष्यानध्यापयामास तेऽप्यन्यान् छन्दोगानेवमन्यत्रापि गृह्यमन्त्रादिकमुक्तमूह्यम् अतस्तत्तच्छाखिनस्तत्तच्छाखोक्तमाचरन्ति इति स्मृतिवाक्यानुसारिणी श्रुतिः कल्पनीया। आचारे त्वाह विशेषणात् प्राच्यादीनां विशेषव्यवहारदर्शनेनानुमेयश्रुतौ प्राच्यादिविशेषणपदान्तर्भावात् व्यवस्था स्यात् प्राच्यादीनामेव तदाचरणमिति विधानव्यवस्था स्यात् तच्च नेहोपपद्यते। अयम्भावः सर्व्वाचरितेष्वनुगतम् अनाचरितेभ्यश्च व्यावृत्तम् आकृतिव्यक्तिगुणादिकं किञ्चित् विशेषणं न सम्भवति यदुपादाय होलाकाद्यधिकरणं स्यात्। न च प्राचीभवत्वादिरूपप्राच्यादिपदसमाख्या तथेति वाच्यं तद्देशभवानामपि केषाञ्चिदनाचरणात् चिरविनिर्गतस्य तत्तद्देशीयस्य पुत्रपौत्राणां समाख्यायामसत्यामपि होलाका कर्त्तव्येति सामान्यश्रुत्यैवोपपत्तौ प्राच्यादिपदघटितश्रुतिकल्पनमन्याय्यं गौरवात् न चाप्राच्यानामननुष्ठानार्थं प्राच्यादिपदवती कल्पनीया अनाचरणरूपस्याननुष्ठानस्याश्रुतिकल्पकत्वात् तस्येच्छाविरहेणैव सम्भवात्। न हि यदि श्रुतिविहितं स्यात् तदा अप्राच्यैरपि अ-